**Chapter Name:व्रज हरितम् ।** *Marks :(6)*

**Quest:**

**प्रश्नपाठः —** प्रदत्तं गद्यभागं पठित्वा सम्भाषणं पूरयत ।

अहो! वृक्षराजः अस्मानरक्षत् इति संचिन्त्य सर्वे समाश्वस्ताः । पितरौ कृतज्ञतापूर्वं वृक्षराजम् अनमताम् । एतं वृक्षं त्यक्त्वा मे बान्धवाः पक्षिणशच सर्वे गताः। किन्तु अहं कुत्रापि न गच्छामि । कोऽपि मां स्पृशति । ...का एषा ? सा सहसा प्रबुद्धा ।

माता - पुत्रि! शारिके !

शारिका - ................... ।

माता - कुतः त्वं भीता इव दृश्यसे ।

शारिका - .................... ।

माता - एतं वृक्षं त्यक्त्वा सर्वे गताः ।

शारिका - अहं .......................... ।

माता - का एषा । सर्वे प्रबुद्धाः।

**Hint:**

मूल्यनिर्णयसूचकम्

उचितरीत्या सम्भाषणलेखनम् ।

**Chapter Name:व्रज हरितम् ।** *Marks :(6)*

**Quest:**

प्रश्नपाठः —प्रदत्तं कथाभागं पठित्वा पटकथां लिखत ।

एतं वृक्षं त्यक्त्वा मे बान्धवाः पक्षिणश्च सर्वे गताः। किन्तु अहं कुत्रापि न

गच्छामि । कोऽपि मां स्पृशति । ... का एषा ? सा सहसा प्रबुद्धा । वत्से, शारिका पुरतः स्मिताननां काञ्चन तापसीम् अपश्यत् ।

**Hint:**

मूल्यनिर्णयसूचकानि

रङ्गविवरणम् । सम्भाषणम् । विनिमयः । सूचकान्युपयुज्य पटकथालेखनम् ।

**Chapter Name:व्रज हरितम् ।** *Marks :(3)*

**Quest:**

प्रश्नपाठः — गद्यभागं पठित्वा रेखाङ्कितपदानां स्थाने समानार्थकपदानि कोष्ठकात् चित्वा पुनर्लिखत ।

पितरौ भोजनमन्विष्य गतौ । तयोः आगमनकालं यावद् वृक्ष एव पितरौ । कस्यचिज्जालधारिणः लुब्धकस्य शिरसि अपतत् ।

( व्याधस्य, शरीरस्य, द्रुमः, भक्षणम् )

**Hint:**

मूल्यनिर्णयसूचकानि

भोजनम् — भक्षणम् ।

वृक्षः - द्रुमः ।

लुब्धकस्य - व्याधस्य ।

**Chapter Name:व्रज हरितम् ।** *Marks :(3)*

**Quest:**

प्रश्नपाठः — पेटिकातः पदान्युपयुज्य वाक्यानि रचयत ।

| | | |
|---|---|---|
| शारिका | शरेण | तत्रैव उपाविशत् । |
| तयोः | तूष्णीं भूत्वा | वृक्ष एव पितरौ । |
| व्याधस्य | आगमनकालं यावत् | वृक्षः विद्धः । |

**Hint:**

मूल्यनिर्णयसूचकानि

1. शारिका तूष्णीं भूत्वा तत्रैव उपाविशत् ।
2. तयोः आगमनकालं यावद् वृक्ष एव पितरौ ।
3. व्याधस्य शरेण वृक्षः विद्धः ।

**Chapter Name:व्रज हरितम् ।** *Marks :(4)*

**Quest:**

**प्रश्नपाठः** — यथोचितं योजयत ।

| क | ख |
|---|---|
| 1. व्यासः | लुब्धकः |
| 2. व्याधः | महाभारतम् |
| 3. शारिका | द्रुमः |

4. वृक्षः  पक्षी

**Hint:**

मूल्यनिर्णयसूचकानि

| क | ख |
|---|---|
| 1. व्यासः | महाभारतम् |
| 2. व्याधः | लुब्धकः |
| 3. शारिका | पक्षी |
| 4. वृक्षः | द्रुमः |

**Chapter Name:व्रज हरितम् ।** *Marks :(4)*

**Quest:**

**प्रश्नपाठः** – कोष्ठकात् समुचितपदानि स्वीकृत्य गद्यभागस्थरिक्तांशानि पूरयत ।

(व्याधस्य । निर्झर्याः । आन्दोलयन्ति । दृष्ट्वा )

प्रातः ............... कलरवं श्रुत्वा शाखामृगाणां लाङ्गूलान्दोलनं च .............. शाखायां मन्दं मन्दं ............... अहं ............. लक्ष्यमभवम् ।

**Hint:**

मूल्यनिर्णयसूचकानि

निर्झर्याः । दृष्ट्वा । आन्दोलयन्ति । व्याधस्य ।

**Chapter Name:व्रज हरितम् ।** *Marks :(5)*

**Quest:**

**प्रश्नपाठः** — प्रदत्तं गद्यभागं पठित्वा प्रादेशिकभाषया आङ्गलेयभाषया वा अनुवदत ।

पितरौ भोजनमन्विष्य गतौ । तयोः आगमनकालं यावद् वृक्ष एव पितरौ । स अस्मान् पोतकानिव संरक्षति स्म । मम अनुजानां शब्दं श्रुत्वा एव नीडात् बहिरागता । वृक्षस्य अधः तण्डुलान् प्रसृतानपश्यत् ।

**Hint:**

मूल्यनिर्णयसूचकम्

उचितरीत्या भाषान्तरीकरणम्।

**Chapter Name:व्रज हरितम् ।** *Marks :(2)*

**Quest:**

प्रश्नपाठः - उदाहरणानुसारं पदं विश्लेषयत ।

उदा — हरिरत्र - हरिः + अत्र ।

1. कविरत्र - ......... + .......... ।
2. मुनिरपश्यत् - ......... + .......... ।

**Hint:**

मूल्यनिर्णयसूचकानि

1. कविः + अत्र । 2. मुनिः + अपश्यत् ।

**Chapter Name:व्रज हरितम् ।** *Marks :(3)*

**Quest:**

**प्रश्नपाठः —**गद्यभागं पठित्वा क्त्वान्त — ल्यबन्त- तुमुनन्तानि अव्ययानि चित्वा लिखत।

पितरौ भोजनमन्विष्य गतौ । मम अनुजानां शब्दं श्रुत्वा एव नीडात् बहिरागता । तण्डुलानाहर्तुं उद्युक्तायां "हा हतोऽस्मि" इति रुदितमश्रैषम् ।

1. क्त्वान्तम् - .................. ।
2. ल्यबन्तम् - .................. ।
3. तुमुन्नन्तम् - ................. ।

**Hint:**

मूल्यनिर्णयसूचकानि

1. श्रुत्वा । 2. अन्विष्य । 3. आहर्तुम् ।

**Chapter Name:व्रज हरितम् ।** *Marks :(8)*

**Quest:**

प्रश्नपाठः — व्रज हरितम् इति पाठभागानुसारं 'प्रकृतिसंरक्षणम्' इति विषयमधिकृत्य

लघूपन्यासं सूचनामनुसृत्य लिखत ।

सूचनाः — वृक्षाणां प्राधान्यम् । शारिकायाः अवस्था । प्रकृतिसंरक्षणस्य आवश्यकता।

**Hint:**

**मूल्यनिर्णयसूचकानि**

आमुखम्, आशयव्यक्तता, समग्रता, भाषाशुद्धिः, सूचकानां सदुपयोगः ।

**Chapter Name:व्रज हरितम् ।** *Marks :(5)*

**Quest:**

प्रश्नपाठः — पाठभागमनुसृत्य कथास्तम्भं क्रमीकुरुत ।

- वृक्षः सन्तुष्टः अभवत् ।
- एका शारिका वृक्षं त्यक्त्वा गन्तुम् अशक्ता ।
- व्याधस्य शरेण वृक्षः विद्धः विषबाधितः च ।
- शुष्कं वृक्षं त्यक्त्वा सर्वे गतवन्तः ।
- शारिकायाः आर्द्रतायां सन्तुष्टा तापसी वृक्षं शारिकां च अनुगृह्णाति ।

**Hint:**

मूल्यनिर्णयसूचकानि

1. व्याधस्य शरेण वृक्षः विद्धः विषबाधितः च ।
2. शुष्कं वृक्षं त्यक्त्वा सर्वे गतवन्तः ।
3. एका शारिका वृक्षं त्यक्त्वा गन्तुम् अशक्ता ।
4. वृक्षः सन्तुष्टः अभवत् ।
5. शारिकायाः आर्द्रतायां सन्तुष्टा तापसी वृक्षं शारिकां च अनुगृह्णाति ।

**Chapter Name:व्रज हरितम् ।** *Marks :(6)*

**Quest:**

**प्रश्नपाठः** — सूचनामुपयुज्य शारिकायाः वृक्षस्य च मिथः सौहृदमधिकृत्य टिप्पणीं लिखत ।

**सूचनाः** — शारिकायाः अवस्था, सर्पः, व्याधस्य आक्रमणम् ।

**Hint:**

**मूल्यनिर्णयसूचकानि**

आमुखम्। शारिकायाः कथा । सूचकानां सदुपयोगः ।

**Chapter Name:व्रज हरितम् ।** *Marks :(5)*

**Quest:**

**प्रश्नपाठः** — कोष्ठकात् समुचितमुत्तरं निर्धार्य लिखत ।

1. महाभारतस्य कर्ता कः? (कालिदासः, व्यासः, भासः)
2. "नाहं गच्छामि, नाहं गच्छामि,भवन्तं विहाय नाहं कुत्रापि गच्छामि" -कस्याः वचनमिदम् ? (तपस्याः, शारिकायाः, मातुः )
3. भोजनमन्विष्य ................ गतौ । ( व्याधौ, पितरौ, सर्पौ)
4. सः अस्मान् पोतकानिव संरक्षति स्म । कः? (वृक्षः, व्याधः, सर्पः)
5. कस्य आर्द्रता सर्वदा मातुः स्पर्शमिव आश्वासदायिन्यभवत् ? ( सर्पस्य, वृक्षस्य, व्याधस्य)

**Hint:**

मूल्यनिर्णयसूचकानि

1. व्यासः । 2 . शारिकायाः । 3 . पितरौ । 4 . वृक्षः । 5 . वृक्षस्य ।

**Chapter Name:व्रज हरितम् ।** *Marks :(8)*

**Quest:**

**प्रश्नपाठः — प्रदत्तां खण्डिकां पठित्वा प्रश्नानाम् उत्तराणि लिखत ।**

प्रातः निर्झयाः कलरवं श्रुत्वा शाखामृगाणां लाङ्गूलान्दोलनं च दृष्ट्वा शाखायां मन्दं मन्दं आन्दोलयन्ती अहं व्याधस्य लक्ष्यमभवम् । वृक्षस्य अधः कोटरवासी कश्चन सर्पः व्याधस्य पादयोरन्तरेण झटिति असरत् । विगलितलक्ष्यस्य व्याधस्य शरेण वृक्षः विद्धः । यद्यपि अहं रक्षिता, तथापि विषबाधितः अयं वृक्षः क्रमेण नाशोन्मुखोऽभवत् । एतं वृक्षं त्यक्त्वा मम बान्धवाः पक्षिणश्च सर्वे गताः । किन्तु अहं कुत्रापि न गच्छामि ।

कोऽपि मां स्पृशति ................. का एषा ?

सा सहसा प्रबुद्धा ।

वत्से, शारिका पुरतः स्मिताननां काञ्चन तापसीम् अपश्यत् । अम्ब ! प्रणामः । शारिके ! जानामि सर्वं वृत्तान्तम् । सम्यगाचरितं भवत्या, तव स्नेहस्य ममतायाः, आर्द्रतायाः च फलं नूनं प्राप्स्यसि ।

1. कस्य शरेण वृक्षः विद्धः ?
2. सर्पः कुत्र वसति ?
3. शारिका पुरतः स्मिताननां काञ्चन ............ अपश्यत् । (सर्पम्, तापसीम्,वृक्षम् )
4. खण्डिकायाः आशयं संगृह्य स्ववाक्ये लिखत ।

**Hint:**

मूल्यनिर्णयसूचकम्

1 .व्याधस्य -1 -

2.कोटरे -1 -

3. तापसीम् -1 -

4. उचितलेखनम् । -5 -

**Chapter Name:व्रज हरितम् ।** *Marks :(6)*

**Quest:**

एकेन द्वयेन वा वाक्येन उत्तरयत

प्रात: निर्झर्या: कलरवं श्रुत्वा , शाखामृगाणाम् लाङ्गूलान्दोलनं च दृष्ट्वा , शाखायां मन्दं मन्दं आन्दोलयन्ती अहं व्याधस्य लक्ष्यमभवत् | वृक्षस्य अध: कोडरवासी कश्चन सर्प: व्याधस्य पादयोरन्तरेण झडिति असरत् | विगलितलक्ष्यस्य व्याधस्य शरेण वृक्ष: विद्ध: |

१) कस्या: कलरवं श्रुत्वा आन्दोलयन्ती, व्याधस्य लक्ष्यमभवत् ?

२)क: व्याधस्य पादयोरन्तरेण असरत् ?

३) कस्य शरेण वृक्ष: विद्ध: ?

**Hint:**

१) निर्झर्या: कलरवं श्रुत्वा आन्दोलयन्ती,सा शारिका व्याधस्य लक्ष्यमभवत् |

२) वृक्षस्य अध: कोडरवासी कश्चन सर्प: व्याधस्य पादयोरन्तरेण असरत् |

३) विगलितलक्ष्यस्य व्याधस्य शरेण वृक्ष: विद्ध: |